# শ্রীমহাশাস্ত্রনুগ্রহকবচম্স্তোত্রম্

{॥ শ্রীমহাশাস্ত্রনুগ্রহকবচম্স্তোত্রম্ ॥}

শ্রীদেব্যুবাচ-

ভগবন্ দেবদেবেশ সর্বজ্ঞ ত্রিপুরান্তক

প্রাপ্তে কলিযুগে ঘোরে মহাভূতৈঃ সমাবৃতে ॥ ১

মহাব্যাধিমহাব্যাळঘোররাজৈঃ সমাবৃতে

দুঃস্বপ্নশোকসন্তাপৈঃ দুর্বিনীতৈঃ সমাবৃতে ॥ ২

স্বধর্মবিরতে মার্গে প্রবৃত্তে হৃদি সর্বদা

তেষাং সিদ্ধিঞ্চ মুক্তিঞ্চত্বং মে ব্রূহিবৃষধ্বজ ॥ ৩

ঈশ্বর উবাচ-

শৃণু দেবি মহাভাগে সর্বকল্যাণকারণে ।

মহাশাস্তুশ্চ দেবেশি কবচং পুণ্যবর্ধনম্ ॥ ৪

অগ্নিস্তম্ভ জলস্তংভ সেনাস্তংভ বিধাযকম্ ।

মহাভূতপ্রশমনং মহাব্যাধি নিবারণম্ ॥ ৫

মহাজ্ঞানপ্রদং পুণ্যং বিশেষাত্ কলিতাপহম্ ।

সর্বরক্ষোত্তমং আযুরারোগ্যবর্ধনম্ ॥ ৬

কিমতো বহুনোক্তেন যং যং কামযতে দ্বিজঃ ।
তংতমাপ্নোত্যসন্দেহো মহাশাস্তুঃ প্রসাদনাত্ ॥ ৭

কবচস্য ঋষির্ব্রহ্মা গাযত্রীঃছন্দ উচ্যতে ।
দেবতা শ্রীমহাশাস্তা দেবো হরিহরাত্মজঃ ॥ ৮

ষডঙ্গমাচরেদ্ভক্ত্যা মাত্রযা জাতিযুক্তযা ।
ধ্যানমস্য প্রবক্ষ্যামি শৃণুষ্বাবহিতা প্রিযে ॥ ৯

অস্য শ্রী মহাশাস্তুঃ কবচমন্ত্রস্য । ব্রহ্মা ঋষিঃ ।
গাযত্রীঃ ছন্দঃ । মহাশাস্তা দেবতা । হ্রাং বীজম্ ।
হ্রীং শক্তিঃ । হ্রূং কীলকম্ ।
শ্রী মহাশাস্তুঃ প্রসাদ সিদ্ধ্যর্থে জপে বিনিযোগঃ ॥

হ্রাং ইত্যাদি ষডঙ্গন্যাসঃ ॥

ধ্যানম্ ॥

তেজোমণ্ডল মধ্যগং ত্রিনযনং দিব্যাম্বরালঙ্কৃতং
দেবং পুষ্পশরেষু কার্মুকলসন্মাণিক্যপাত্রাভযম্ ।
বিভ্রাণং করপঙ্কজৈঃ মদগজ স্কন্ধাধিরূঢং বিভুং
শাস্তারং শরণং ব্রজামি সততং ত্রৈলোক্য সংমোহনম্ ॥

লং ইত্যাদি পঞ্চোপচার পূজা ॥

মহাশাস্তা শিরঃ পাতু ফালং হরিহরাত্মজঃ ।
কামরূপী দৃশং পাতু সর্বজ্ঞো মে শ্রুতী সদা ॥ ১

ঘ্রাণং পাতু কৃপাধ্যক্ষো মুখং গৌরীপ্রিয়ঃ সদা ।
বেদাধ্যাযী চ মে জিহ্বাং পাতু মে চিবুকং গুরুঃ ॥ ২

কণ্ঠং পাতু বিশুদ্ধাত্মা স্কন্ধৌ পাতু সুরার্চিতঃ ।
বাহু পাতু বিরূপাক্ষঃ করৌ তু কমলাপ্রিযঃ ॥ ৩

ভূতাধিপো মে হৃদযং মধ্যং পাতু মহাবলঃ ।
নাভিং পাতু মহাবীরঃ কমলাক্ষোঽবতাত্ কটীম্ ॥ ৪

সনীপং পাতু বিশ্বেশো গুহ্যং গুহ্যার্থবিৎসদা ।
ঊরু পাতু গজারূঢো বজ্রধারী চ জানুনী ॥ ৫

জঙ্ঘে পাশাঙ্কুশধরঃ পাদৌ পাতু মহামতিঃ ।
সর্বাঙ্গং পাতু মে নিত্যং মহামাযাবিশারদঃ ॥ ৬

ইতীদং কবচং পুণ্যং সর্বাঘৌঘনিকৃন্তনম্ ।
মহাব্যাধিপ্রশমনং মহাপাতক নাশনম্ ॥ ৭

জ্ঞানবৈরাগ্যদং দিব্যমণিমাদিবিভূষিতম্ ।

আয়ুরারোগ্যজননং মহাবশ্যকরং পরম্ ॥ ৮

যং যং কামযতে কামং তং তমাপ্নোত্যসংশযঃ ।

ত্রিসন্ধ্যং যঃ পঠেদ্বিদ্বান্ স যাতি পরমাং গতিম্ ॥

ইতি শ্রীগুহ্যরত্ন চিন্তামণৌ শ্রীমহাশাস্ত্রনুগ্রহকবচং সমাপ্তম্ ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Maha Shasta Anugraha Kavacham Lyrics in Bengali PDF
% File name : shaastranugrahakavacam.itx
% Category : kavacha
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Antaratma antaratma at Safe-mail.net
% Proofread by : Antaratma antaratma at Safe-mail.net
% Latest update : April 23, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.

% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website